# Shivaradhanamahimanuvarnanam

# શિવારાધનમહિમાનુવર્ણનમ્

## Document Information

Text title : Shivaradhanamahimanuvarnanam 1

File name : shivArAdhanamahimAnuvarNanam1.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 24 | vAvRittashlokAH ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# શિવારાધનમહિમાનુવર્ણનમ્

શિવપૂજનમેવ કેવલં સકલાર્થપ્રદમર્થસિદ્ધિભિઃ ।
તદપેક્ષિતમેવ સાધનં વિવિધં તાવદશેષસિદ્ધિદમ્ ॥ ૨૪.૨॥

યદા શઙ્કરારાધનાસક્તમેતન્મનઃ સ્યાત્ તદા કાલભીતિઃ કુતઃ સ્યાત્ ।
વયં શઙ્કરારાધનેનૈવ કાલં નયામો નયામો નયામો નયામઃ ॥ ૨૪.૧૧॥

ઇદં ચેયઃ શઙ્કરારાધનેન ક્ષયં યાતિ પુણ્યૈરગણ્યૈસ્તદા કિમ્ ।
સ કાલોઽપિ ભીતોઽતિનિત્યં પ્રપન્નઃ ભવેદસ્મદીયાંસ્તથાઽસ્માન્ વિશિષ્ય ॥ ૨૪.૧૨॥

મહાકાલકાલાર્ચનાસક્તચિત્તઃ ક્ષણં વા ક્ષણાર્ધં ચ એવ પ્રબુદ્ધઃ ।
તમારાધયત્યેવ કાલોઽપિ નૂનં સ ભીતસ્તદીયાંસ્તદારાધકાંશ્ચ ॥ ૨૪.૧૩॥

કઃ કાલકાલભજનાનુરતો ન લોકે શોકાપહારકરણોદ્યતચિત્તવૃત્તિઃ ।
સર્વાઘનાશક ઇતિ પ્રથિતઃ સ શોકં નિર્મૂલયિષ્યતિ સદાશિવ એવ નિત્યમ્ ॥ ૨૪.૧૪॥

મહામૃત્યુમૃત્યું મહાદેવમેકં સમારાધ્ય કો વા ન યાત્યેવ મુક્તિમ્ ।
જરાજન્મદુઃખાદિસંહારહેતુઃ વૃષાધીશકેતુર્હતામ્ભોજકેતુઃ ॥ ૨૪.૧૬॥

મહેશ્વરકથારસઃ સરસમાનસે કેવલં
સુખાનિ જનયત્યહો મુહુરપારરૂપાણ્યપિ ।
ક્ષણાર્ધમપિ શઙ્કરો યદિ મુદા હૃદમ્ભોજગઃ
કદા સુખમહોદધિઃ કિમિતિ ન પ્રબુદ્ધો ભવેત્ ॥ ૨૪.૨૯॥

અપારસુખરૂપતામુપગતોઽપિ મુક્તો ભવેત્
ઉમાપતિપદામ્બુજસ્મરણલાલસે માનસે ।
કદાપિ ન જનિર્ભવેત્ ન ચ જરાઽપિ મૃત્યુર્ભવેત્
ઇતિ સ્મરહરં સ્મર સ્મર પુનઃ પુનઃ શઙ્કરમ્ ॥ ૨૪.૩૦॥

શિવાર્ચનાકારમહાગ્નિદગ્ધમપારપાપોરુપતઙ્ગજાતમ્ ।
ભવત્યવશ્યં તત એવ નિત્યં મહેશ્વરારાધનમેવ કુર્મઃ ॥ ૨૪.૫૫॥

શિવપૂજનરૂપમૌષધં હૃદયે યસ્ય નિવિષ્ટમેકદા ।
તદપારમહાભયાપહં ભવતીત્યેવ મતિર્મમાધુના ॥ ૨૪.૫૬॥

ધન્યાસ્તે હૃદિ સન્તતં શિવપદામ્ભોજં નિધાયાદરાત્
આનન્દામૃતધારયાઽપિ પરયા ગમ્ભીરયા સેચનમ્ ।
કુર્વન્તો વિરતિં ન યાન્તિ સુકૃતૈરપ્યન્તહીનૈર્મુહુઃ
તદ્ભાગ્યં ભુવનેષુ દુર્લભતરં તદ્ભુક્તિમુક્તિપ્રદમ્ ॥ ૨૪.૬૦॥

નિધાય હૃદિ શઙ્કરં યદિ વિધાય પૂજાં મુહુઃ પ્રનૃત્યતિ મહેશ્વર સ્મરહરેતિ હારઃ પરમ્ ।
તદા પરમવાપ્નુયાત્ ગિરિશપાદુકારાધનપ્રસાદમતિદુર્લભં શુભમદ્ભુતં સન્તતમ્ ॥ ૨૪.૬૧॥

તિરસ્કરોત્યેવ યમં યમાદિભિઃ વિનાપિ તાવત્ સકૃદાદરેણ ।
સ્મૃત્વા સકૃદ્વા શિવમાદરેણ પ્રયાતિ દુઃખૌઘમહાબ્ધિપારમ્ ॥ ૨૪.૬૨॥

શિવનામસુધામુહુર્મુહુઃ યદિ પીતા સકૃદેવ વા તદા ।
સકલાઘવિપર્યયો ભવેદપિ મુક્તિશ્ચ ભવત્યપિ ધ્રુવમ્ ॥ ૨૪.૬૮॥

વારં વારં શઙ્કરધ્યાનરૂપં પીયૂષં ચેત્ પીતમત્યાદરેણ ।
પાપૈર્ભીતિ નોપયાત્યેવ સત્યં મોક્ષશ્રીરપ્યાદરેણાવૃતા સ્યાત્ ॥ ૨૪.૭૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવારાધનમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૪। વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 24. vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Shivaradhanamahimanuvarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*